पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥”
इति निम्बादिघृतम् । इति भावप्रकाशः ॥

पद्मिनीकान्तः, पुं, (पद्मिन्याः कान्तः । पद्मपुष्पप्रकाशकत्वादस्य तथात्वम् ।) सूर्य्यः । इति जटाधरः ॥

पद्मिनीवल्लभः, पुं, (पद्मिन्या नलिन्या वल्लभः प्रियः । पद्मिनी वल्लभाऽस्येति वा ।) सूर्य्यः । इति शब्दरत्नावली ॥

पद्मी, [न्] पुं, (पद्मं बिन्दुजालकमस्त्यस्य । पद्म + इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३५ ॥ (यथा, महाभारते । १२ । २६ । ६६ ।
“सर्व्वा रथगताः कन्या रथाः सर्व्वे चतुर्युजः ।
शतं शतं रथे नागाः पद्मिनो हेममालिनः ॥”
नाभिकमले हस्ते वा पद्ममस्यास्तीति । विष्णुः । यथा, महाभारते । १३ । १४६ । ५० ।
“अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥”)

पद्मेशयः, पुं, (पद्मे शेते इति । शी ङ ल शयने + “अधिकरणे शेतेः ।” ३ । २ । १५ । इति अच् । “शयवासवासिष्विति ।” ६ । ३ । १८ । इत्यलुक् ।) विष्णुः । इति हेमचन्द्रः ॥

पद्मोत्तरः, पुं, (पद्मादुत्तरः वर्णतः श्रेष्ठः ।) कुसुम्भः । इति राजनिर्घण्टः ॥

पद्मोत्तरात्मजः, पुं, (पद्मोत्तरस्य आत्मजः पुत्त्रः ।) जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥

पद्मोद्भवः, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्मे पद्माद्वा उद्भवो यस्य ।) ब्रह्मा । अब्जयोनिरित्यमरदर्शनात् ॥ (यथा, महाभारते । १३।६।४ ।
“ततः पद्मोद्भवो राजन् ! देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ॥”)

पद्मोद्भवा, स्त्री, (पद्मे पद्माद्वा उद्भवो यस्याः ।) मनसा देवी । यथास्याः पौराणिकध्यानम् ।
“कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां शोभनां
नागेन्द्रैः क्षतशेखरां विषहरीं पद्मोद्भवां जाङ्गलीम् ॥”

पद्यं, क्ली, (पदं चरणमर्हतीति । पद + यत् ।) कविकृतिः । श्लोकः । इत्यमरः । ३ । ५ । ३१ ॥ तस्य लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
“पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥”
(तत्तु अन्वयगतिवशात् मुक्तकयुग्मकसन्दानितककलापककुलकभेदात् पञ्चविधम् । यदुक्तं साहित्यदर्पणे । ६ । २८७ ।
“छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥”
“तदूर्द्ध्वं कुलकं स्मृतम् ।” इति क्वचित् पाठः ॥)
शाठ्यम् । इति जटाधरः ॥ (“पदमस्मिन् दृश्यम् ।” ४ । ४ । ८७ । इति यत् । नातिशुष्ककर्द्दमः । इति सिद्धान्तकौमुदी ॥)

पद्यः, पुं, (पद्भ्यां जातः । पद + यत् ।) शूद्रः । इति मेदिनी ॥ (यदुक्तं यजुषि ।
“ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥”)

पद्या, स्त्री, (पादाय हिता । शरीरावयवात् यत् । “पद्यत्यतदर्थे ।” ६ । ३ । ५२ । इति पद्भावः ।) सृतिः । इति विश्वः ॥ पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, ऋग्वेदे ।२।३१।२।
“यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥” पादौ विध्यन्ति पद्याः शर्कराः । इति सिद्धान्तकौमुदी । “विध्यत्यधनुषा ।” ४ । ४ । ८३ । इति यत् । “पद्यत्यतदर्थे ।” ६।३।५२ । इति पदादेशः ॥)

पद्रः, पुं, (पद्यतेऽस्मिन्निति । पद गतौ । “स्फायितञ्चीति ।” उणां । २ । १३ । इति रक् ।) ग्रामः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ग्रामपथः । इत्युणादिकोषः ॥ भूलोकः । देशभेदः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पद्वः, पुं, (पद्यते गम्यतेऽस्मिन्ननेन वा । पद गतौ “सर्व्वनिघृष्वरिष्वेति ।” उणां । १ । १५३ । इति निपातनात् सिद्धम् ।) भूलोकः । रथः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पन्थाः । इत्युणादिकोषः ॥

पद्वा, [न्] पुं, (पद्यते गम्यते यत्र । पद गतौ + “स्नामदिपद्यर्त्तीति ।” उणां । ४ । ११२ । इति वनिप् ।) पन्थाः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पन, ङ ईङे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ईङः स्तुतिः । (पनायति पनायते विष्णुं धीरः । आयान्तत्वादुभयपदमिति वोपदेवः । अन्ये तु आयस्याप्राप्तिपक्षे आत्मनेपदमेव । ङ, अपनिष्ट पेने पनिता पनिषीष्ट पनिष्यते अपनिष्यत । इति दुर्गादासः ॥

पनसः, पुं, (पनाय्यते स्तूयतेऽनेन देवः मनुष्यादिर्व्वेति । यद्वा पनायति स्तौति सन्तोषयतीत्यर्थः देवमनुष्यादीन् इति । पन स्तुतौ + “अत्यविचमितमीति ।” उणां । ३ । ११७ । इति असच् ।) फलवृक्षविशेषः । काँटाल इति भाषा ॥ (यथा भागवते । ८ । २ । १८ ।
“चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥”)
तत्पर्य्यायः । कण्टकिफलः २ । इत्यमरः । २।४।६१ ॥ महासर्ज्जः ३ फलिनः ४ फलवृक्षकः ५ स्थूलः ६ कण्टफलः ७ मूलफलदः ८ अपुष्पफलदः ९ पूतफलः १० चम्पकोषः ११ चम्पालुः १२ कण्टकीफलः १३ रसालः १४ अद्रङ्गफलः १५ पानसः १६ । इति शब्दरत्नावली ॥ अस्य फलगुणाः । मधुरत्वम् । सुपिच्छिलत्वम् । गुरुत्वम् । हृद्यत्वम् । बलवीर्य्यवृद्धिदत्वम् । श्रमदाहविशोषनाशित्वम् । रुचिकारित्वम् । ग्राहित्वम् । परमदुर्ज्जरत्वञ्च । तद्बीजगुणाः । ईषत्कषायत्वम् । मधुरत्वम् । वातलत्वम् । गुरुत्वम् । रुच्यत्वम् । तत्फलविकारत्वग्दोषनाशित्वञ्च ।
“बालन्तु नीरसं हृद्यं मध्यं पक्वन्तु दीपनम् ।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्मृतम् ॥”
इति राजनिर्घण्टः ॥ * ॥
“पनसः कण्टकिफलः फलाशोऽतिबृहत्फलः ।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ॥
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान् ॥
आमन्तदेव विष्टम्भि वातलं तुवरं गुरु ।
दाहकृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ॥
पनसोद्भवबीजानि वृष्याणि मधुराणि च ।
गुरूणि बद्धवर्च्चांसि सृष्टमूत्राणि संवदेत् ॥”
अन्यच्च ।
“मज्जा पनसजो वृष्यो वातपित्तकफापहः ।
विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥
अलं पनसपाकाय फलं कदलसम्भवम् ॥”
इति भावप्रकाशः ॥ * ॥
“कण्टाफलं सुमधुरं बृंहणं स्निग्धशीतलम् ।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम् ॥
तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम् ।
छर्द्दिघ्नं न च चक्षुष्यं उष्णञ्च वातपित्तनुत् ॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम् ।
रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम् ॥”
इति राजवल्लभः ॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन स्तुल्यं यत्तालम् । तद्वत् फलमस्त्यस्याः । ठन् ।) कण्टकिफलम् । इति शब्दमाला ॥

पनसिका, स्त्री, (पनसवत् कण्टकमयाकृतिर्विद्यते यस्याः । पनस + ठन् ।) क्षुद्ररोगविशेषः । स च कर्णमध्यजातव्रणः । तल्लक्षणं यथा,—
“कर्णस्याभ्यन्तरे जातां पिड़कामुग्रवेदनाम् ।
स्थिरां पनसिकां तान्तु विद्याद्वातकफोत्थिताम् ॥”
तच्चिकित्सा यथा,—
“भिषक् पनसिकां पूर्व्वं स्वेदयेदथ लेपयेत् ।
कल्कैर्मनःशिलाकुष्ठनिशातालकदारुजैः ॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत् ॥”
इति भावप्रकाशः ॥

पन्थाः, [इन्] पुं, पतन्ति यान्त्यनेन । (पत् ऌ गतौ + “पतस्थ च ।” उणां । ४ । १२ । इति इनिः थश्चान्तादेशः ।) रथ्या । रास्ता इति भाषा ॥ (यथा, मनुः । ४ । ४५ ।
“न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ॥”)
तत्पर्य्यायः । अयनम् २ वर्त्म ३ मार्गः ४ अध्वा ५ पदवी ६ सृतिः ७ सरणिः ८ पद्धतिः ९ पद्या १० वर्त्तनी ११ एकपदी १२ । इत्यमरः । २।१।१५॥ पथः १३ पदविः १४ पदवी १५ सरणी १६ शरणिः १७ पद्धती १८ वर्त्तनिः १९ । इति भरतः ॥ शरणी २० वाटः २१ धर्म्मवर्त्मनम् २२ माथः २३ विवधः २४ वीवधः २५ । इति शब्दरत्नावली ॥ * ॥
तस्य लक्षणम् ।
“विंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।